# मीमांसाशास्त्री

## निर्दिष्टाः फलितांशाः (Specific outcomes) -

**एतस्य कार्यक्रमस्य परिणामाः –**

- मीमांसाशास्त्रपरम्परायाः प्रमेयाणां च अधिगमेन नैतिक-सामाजिक-सांस्कृतिकदायित्वबोधयुक्तस्य सभ्यनागरिकस्य आविष्कृतिः ।
- मीमांसाशास्त्रस्य विविधप्रस्थानेषु प्रदर्शितानां तत्त्वानां चिन्तनेन परिनिष्ठितज्ञानावाप्तिः, तेन च परिनिष्ठितज्ञानेन व्यक्तित्वविकासः ।
- मीमांसाशास्त्राध्ययनेन मीमांसकसम्मतप्रमाणप्रमेयाणां निष्कृष्टज्ञानावाप्तिः भवति ।
- धर्मनिरूपणार्थं प्रदर्शितानाम् एकत्रिंशदलौकिकप्रमाणानां ज्ञानम् एतच्छास्त्राधिगमनेनैव सिद्ध्यति नान्यथा ।
- मीमांसाशास्त्राध्ययनेन शास्त्रसम्मतधर्मस्वरूपं, धर्मज्ञानं च सिद्ध्यति तादृशशास्त्रोक्तधर्मानुष्ठानेन सुखशान्त्यादिप्राप्तिः, तया च स्वस्थसमाजनिर्मितिः ।
- मीमांसाशास्त्राध्ययनेन श्रुतिस्मृतिसदाचारेषु प्रामाण्यबुद्धिजननं श्रद्धोन्नयनं च भवति, तेन सुसंस्कृतसमाजनिर्माणं भवति ।
- आचार्यप्रभृतिस्नातकोत्तरकार्यक्रमेषु शिक्षासास्त्री (B.Ed) कार्यक्रमे च प्रवेशार्हता ।
- स्नातकैः प्राप्तुं शक्यानाम् उद्योगावकाशानामुपलब्धिः ।
- संस्कृतस्य शास्त्रस्य च विषयमवलम्ब्य समायोज्यमानासु परीक्षासु स्पर्धासु च प्रवेशार्हता साफल्यं च ।

# मीमांसाशास्त्री -प्रतिष्ठा

## निर्दिष्टाः फलितांशाः (Specific outcomes) -

### एतस्य कार्यक्रमस्य परिणामाः –

- मीमांसाशास्त्रपरम्परायाः प्रमेयाणां च अधिगमेन नैतिक-सामाजिक-सांस्कृतिकदायित्वबोधयुक्तस्य सभ्यनागरिकस्य आविष्कृतिः ।
- मीमांसाशास्त्रस्य विविधदार्शनिकसिद्धान्तानां गूढज्ञानम् ।
- परमप्रमाणभूतस्य वेदस्य तात्पर्यार्थनिर्णयः कथं भवितुमर्हतीति विशिष्टज्ञानाधिगमप्राप्तिः।
- मीमांसाशास्त्राध्ययनेन शास्त्रेऽस्मिन् लोकवेदसाधारण्येन प्रतिपादिताः न्यायाः ज्ञायन्ते । ते च न्यायाः वेदान्तादिशास्त्रान्तराध्ययनाय उपकारकाः सन्तः मीमांसाशास्त्रव्युत्पत्तिं सम्पादयन्ति । ते च न्यायाः लोके न्यायालयेष्वपि न्यायनिर्णये कथं उपकारकाः भवन्तीति स्पष्टज्ञानं सिध्यति ।
- न्यायानां सञ्चारक्रमः शास्त्रार्थनिरूपणे कथमुपादेयो भवतीति एतच्छास्त्राध्ययनेनैव भवति ।
- धर्मनिरूपणार्थं प्रदर्शितानाम् एकत्रिंशदलौकिकप्रमाणानां ज्ञानम् एतच्छास्त्राधिगमनेनैव सिध्यति नान्यथा ।
- मीमांसाशास्त्राध्ययनेन श्रुतिस्मृतिसदाचारेषु प्रामाण्यबुद्धिजननं श्रद्धोन्नयनं च भवति तेन सुसंस्कृतसमाजनिर्माणं भवति ।
- आचार्यप्रभृतिस्नातकोत्तरकार्यक्रमेषु शिक्षासास्त्री (B.Ed) कार्यक्रमे च प्रवेशार्हता ।
- विशिष्टस्नातकैः प्राप्तुं शक्यानाम् उद्योगावकाशानामुपलब्धिः ।
- संस्कृतस्य शास्त्रस्य च विषयमवलम्ब्य समायोज्यमानासु परीक्षासु स्पर्धासु च प्रवेशार्हता साफल्यं च ।

# मीमांसा आचार्यः

## निर्दिष्टाः फलितांशाः (Specific outcomes) -

**एतस्य कार्यक्रमस्य परिणामाः –**

❖ मीमांसाशास्त्रस्य विविधप्रस्थानसिद्धान्तानां गूढज्ञानम् ।

❖ परमप्रमाणभूतस्य वेदस्य तात्पर्यार्थनिर्णयः कथं भवितुमर्हतीति विशिष्टज्ञानाधिगमप्राप्तिः।

❖ मीमांसाशास्त्राध्ययनेन शास्त्रेऽस्मिन् लोकवेदसाधारण्येन प्रतिपादिताः न्यायाः ज्ञायन्ते । ते च न्यायाः वेदान्तादिशास्त्रान्तराध्ययनाय उपकारकाः सन्तः मीमांसाशास्त्रव्युत्पत्तिं सम्पादयन्ति । ते च न्यायाः लोके न्यायालयेष्वपि न्यायनिर्णये कथं उपकारकाः भवन्तीति स्पष्टज्ञानं सिद्ध्यति ।

❖ शाब्दबोधप्रक्रियायाः विशिष्टज्ञानावाप्तिः ।

❖ धर्मनिरूपणार्थं प्रदर्शितानाम् एकत्रिंशदलौकिकप्रमाणानां ज्ञानम् एतच्छास्त्राधिगमनेनैव सिद्ध्यति नान्यथा ।

❖ श्रौतकर्मानुष्ठानार्थम् अपेक्षिताः पारिभाषिकपदार्थाः मीमांसाध्ययनद्वारा स्पष्टा भवन्ति ।

❖ न्यायादिभिः आस्तिकदर्शनैः चार्वाकादिभिः नास्तिकदर्शनैः च सह मीमांसादर्शनस्य तुलनात्मकमध्ययनं कर्तुं क्षमतायाः प्राप्तिः ।

❖ मीमांसाज्ञानं श्रौतयज्ञेषु स्मार्तयज्ञेषु (कर्मकाण्डे) च उपयोक्तुं सामर्थ्यविकासः ।

❖ विद्यावारिधिः (Ph.D) उपाध्यर्थम् अनुसन्धानयोग्यताप्राप्तिः ।

❖ विश्वविद्यालयस्तरे अध्यापनकौशलप्राप्तिः ।

❖ एतच्छास्त्रेण प्रतिपादितम् अर्थापत्त्यनुपलब्ध्योः प्रमाणातिरिक्तत्वे सार्थक्यं वेदान्तादिषु कथमुपकारकमिति शास्त्राध्ययनेनानेन फलिष्यति ।

- संस्कृतस्य शास्त्रस्य च विषयमवलम्ब्य समायोज्यमानासु परीक्षासु स्पर्धासु च प्रवेशार्हता साफल्यं च ।
- मीमांसाशास्त्रस्य वाक्यशास्त्रत्वात् वाक्यार्थनिर्णये परिनिष्ठितज्ञानावाप्तिः ।
- मीमांसाशास्त्रस्य विचारशास्त्रत्वात् ग्रन्थस्थविषयाणामुपरि अपि चिन्तनं कर्तुं सामर्थ्यावाप्तिः ।
- एतच्छास्त्राध्ययनेन स्नातकलक्षणानि स्पष्टं ज्ञायन्ते ।

# विद्यावारिधिः (Ph.D) मीमांसादर्शनम् (सर्वदर्शनम्)

## निर्दिष्टाः फलितांशाः (Specific outcomes) -

- ❖ श्रुतिस्मृतिसदाचाराणां तत्त्वज्ञानेन श्रुत्याद्युक्तमार्गानुसारिणः मानवसमाजस्य निर्माणम् ।
- ❖ स्नातकोत्तरयोग्यानाम् उद्योगावसराणां प्राप्तिः ।
- ❖ मीमांसाशास्त्रसम्बद्धानां प्राचीनपाण्डुलिपीनां (Manuscripts) सम्पादने, समीक्षणे, प्रकाशने च सामर्थ्यस्य विकासः ।
- ❖ लेखनकौशलविकासः ।
- ❖ मीमांसाशास्त्रस्य वाक्यशास्त्रत्वात् वाक्यार्थनिर्णये परिनिष्ठितज्ञानावाप्तिः ।
- ❖ मीमांसाशास्त्रस्य विचारशास्त्रत्वात् ग्रन्थस्थविषयाणामुपरि अपि चिन्तनं कर्तुं सामर्थ्यावाप्तिः ।
- ❖ मीमांसान्यायैः लौकिकव्यवहारेषु धर्मशास्त्रादिषु च निर्णयकरणसामर्थ्यविकासः ।
- ❖ विधिशास्त्रे (Law) मीमांसाशास्त्रस्य उपयोगस्थापनम् ।
- ❖ दार्शनिकविषयेषु अनुसन्धानेन सिद्धान्तानामाविष्कारः परिष्कारश्च ।
- ❖ श्रौतयज्ञप्रक्रियायाः विषदं ज्ञानम् ।
- ❖ विद्यावारिध्युत्तरानुसन्धानपरियोजनासु (P.D.F) प्रवेशार्हता ।
- ❖ विश्वविद्यालयेषु महाविद्यालयेषु च अध्यापनानुसन्धानयोग्यताप्राप्तिः ।